अथ पंचायुध स्तन्नः

सुवर्ण रत्नान्वित मुज्वलान्तं महा प्रभावैः परतः परंशरम् ।
सदैव श्री राघव दक्षिणे करे प्रकाश मानं तमहं भजामि ॥ १ ॥
निरंतरं राघव वाम वाहौ विराजितं दिव्यतमं विचित्रम् ।
यदंश संभूत मशेष सर्गं भजामि भक्त्या च धनुर्धुरीणम् ॥ २ ॥
विचित्र माणिक्य विभावितं वरं भजामितूणीर महं निरंतरम् ।
रघुत्तमस्यैक कटि प्रदेशे समुल्लसंतं शर संघ संयुतम् ॥३॥
निराकृता शेषसुदाम संभवंस्वकाशत श्चंद्रमरीचि निर्जितम् ।
विपक्ष पक्ष क्षयिणं क्षितीस्वरं भजामि रामायुध खड्ग मुत्तमम् ॥४॥

प्रपन्न तापार्ति हरं प्रसन्नं प्रभासमानं वपुषा परेश्वरम् ।
सदैव श्री राघव सन्निधानं भजामि श्री पावन मायुधालयम् ॥५॥
समस्त दुःखौघ विनाशहेतुं सुपंचकं चायुध संस्तवं परम् ।
पठेद्यदिक्षे दभयं सुखास्पदं तथैव रामस्य सुख प्रसादजम् ॥६॥

इति श्री युगलानन्य कृतं श्री रामायुध पंचकं समाप्त ।

॥ इति शुभममूयात् ॥

pdf made by raghav priya sharan